International Journal of Sanskrit Research 2022; 8(4): 155-158

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(4): 155-158
© 2022 IJSR
www.anantaajournal.com
Received: 19-04-2022
Accepted: 08-06-2022

**डॉ. सुनिल्कुमार् कोरोत्त्**

संस्कृताध्यापकः जि.एच्.एस्

तच्चङ्गाट् कासरगोट्–केरलम्, भारत

# बृहत् ओप्पना (Brihath Oppana) (संस्कृतगानम् ओप्पना-कलारूपाय)

**डॉ. सुनिल्कुमार् कोरोत्त्**

**प्रस्तावना**

उत्तरकेरलेषु विद्यमानेषु मुस्लींकलारूपेषु श्रद्धेयः भवति ओप्पना इति । मुस्लीं धर्मावलम्बिनां विवाहवेलासु वर्णशबलानि वस्त्राणि धृत्वा सविशेषतालयुक्तं गानम् अनुसृत्य हस्तताडनैः अङ्गचलनैः सह नार्यः ओप्पना इति कलारूपं प्रस्तुतीकुर्वन्ति। ओप्पनागानस्य विषयेषु प्रायेण नववध्वाः तथा नववरस्य च गुणगणवर्णनं विवाहसंप्रदायः,आगतेभ्यो अतिथिभ्यो विवाहानुमत्यर्थम् अभ्यर्थना इत्यादयः अन्तर्भवन्ति। केरलीयविद्यालय- कलालयकलोत्सवादिषु च कलारूपोऽयम् सार्वत्रिकतया अवतार्यते ।

किन्तु पारम्पर्यं क्रमम् उल्लङ्घ्य तथा कथातन्तुं परिवर्त्य केवलं तालमवलम्ब्यैव विवाहेतरवेदिकायां बहुजनसमक्षम् प्रस्तुतीकरणं कृतं छात्रैः बृहत् ओप्पना इति नाम्नि।२०१९ केरल-राज्यस्तरीये विद्यालयकलेत्सवे ३०१ छात्रैः अयम् अवतारितः आसीत् । अत्र प्रधाना सविशेषता तु इदंप्रथमतया संस्कृतभाषया अस्य प्रयोग इत्येषा।तथा कलारूपेस्मिन् चेण्टा,इडक्का इति वाद्योपकरणयोः प्रयोगः अपि प्रप्रथम एव।

केरलं दैवस्य स्वदेशःइत्यस्ति एका प्रथा। एतेन परामर्शेन गानमिदमारभ्यते।"आचारानुष्ठानात् महनीयसंस्काराच्च दैवस्य स्वदेशः इत्यभिधीयते" इति कथनेन गीतमिदमारभ्यते।केरलस्योत्पत्तिसम्बद्धां ऐतिह्यकथां संसूच्य तथा प्राचीनकालीनानां राज्ञां महत्वमुद्घोष्य च भाषाभेदेन रूपीकृतस्य केरलस्य चरितम् आवृणोत्यत्र।भारतीयानां सार्वलौकिकतां धर्मसहिष्णुतां तथा परस्परसौहार्दभावनां च प्राधान्येनात्र प्रतिपादयन्ति।विश्वमानविकतायै भारतराष्ट्रेन दत्तां महोक्तिं चात्र सगौरवं वर्णयति।मध्ये केरलेषु दुरितं कृतानां जलक्षोभानां वर्णना,तस्मात्

**Corresponding Author:**
**डॉ. सुनिल्कुमार् कोरोत्त्**

संस्कृताध्यापकः जि.एच्.एस्

तच्चङ्गाट् कासरगोट्–केरलम्, भारत

पुनरुज्जीवितानां जनानां विवरणं तथा तदर्थं साहाय्यं कृतानां सुमस्कानां मनोनैर्मल्यं चात्र सान्दर्भिकतया प्रतिपादयन्ति।

पङ्क्तयः-

आचारानुष्ठानात् महनीयसंस्काराच्च
दैवस्य स्वदेश इत्यभिधीयते।
जनतानां चिन्मुकुरे
सञ्चारीणां चरितरेखासु
सुरभिलवचसा वर्ण्यन्ते
देशचरित्राणि।
परशुधरेण रामेण
देशस्यस्योत्पत्तिर्सम्भूतेति कथ्यते
ऐतिह्यरूपेण।
भारतराष्ट्रस्य
दक्षिणराज्यानि
भाषाभेदेनैव
रूपीकृतानि सन्त्यत्र। (आ आ आ.....)

केरलमित्येषः देशः
इति केरवृक्षसङ्कुलात्। (२)

केरलेति ख्यातिं कृत्वा
सकललोकाय नित्यं
अभिमानपूर्णतया ज्योतिं
दत्वा महिमानमभिलषतीदम्। (२)
मामकदेशस्तु श्रेष्ठः
सः सर्वेषामाधारदेशः
पूर्विकाः राजानः
एतं देशमभिरक्ष्य
श्रेष्ठं पदं सम्मान्यापि राष्ट्रं
मम महत्तरं कारयित्वा तुष्टाः। (२)

भारतराष्ट्रस्य पुत्रो
सः विश्वस्य आदर्श एव।
चेर-चोल-पाण्ड्यगर्वं
सर्वत्रापि प्रसारयन्
तेषां नाम सुवर्णरेखेव
चरित्रपदमिदं प्राप्तम्। (आ.... चरित्रपदमिदं प्राप्तम्) ३
प्राप्तधर्मं सर्वं मत्वा
मानव आचरति।
राष्ट्रबोधं सुस्थापयितुं
धर्मबोधः पर्याप्तः।
येन येन कर्मणा येन येन बोधेन
मर्त्यजन्मसफलाय स्नेह एव वरः
विश्वं सर्वं दीपयितुं भारतं महत्।

महत्वसंस्कृतिसंरचना तु भारतवर्षात्
केरलमपि तस्मिन् विषये प्रेरकमेव।
सर्वे सन्तु सुखिनः
सर्वे सन्तु निरामयाः
इत्यादि कथनैः लोकमतिशयते।
श्रेष्ठकर्मपालनं तु
धर्म एव वै हि।

एकभावं हृत्सु विधाय
सर्वं साधयते।
परस्परसौहार्दभावाः
केरलमुखमुद्राः (२) आ आ...

हिन्दु-मुस्लीं-क्रिस्त्यन्
धर्मनिष्ठा नित्यम्।
एकसोदरबोधात्
जीवन्त्यत्र तोषात्।

तादृशो हि तोषः सर्वः
अतिशयेन दृश्यते जनैः
तोषमखिलं शिथिलं कुर्वन्
प्रकृतिकोपः क्वचित् जायते।

कोपि नास्ति शक्तः
प्रकृतिकोपवारणे
पूर्वसज्जता कार्या
शाश्वतसद्वृत्तये।

सुरभिलं हि केरलं मे
जलक्षोभादखिलं त्रासितं
जीवहान्या भूविनाशात्
मर्त्यहृदयं खेदपूर्णम्।
प्रकृतेः रक्षायै
मिलित्वैव यतामो वयम्।
मानवचिन्तनं तु
रक्षणविषये विरूपरूपम्।
न केवलं प्रकृतिस्तु
मनुष्यस्य मनश्चापि
विभागीयचिन्तायुक्तम्।
तेनैव आचरन्ति दूषणानि बहुविधानि
आपदो दर्शनेन
उच्चैरुच्चर्विलपन्ति ते। (ए ए .....)

तेनैव कारणेन
नैव जायन्ते अनुदिनं
दुरितव्यथादयः
मानवपावनचेतः हर्तुं तत्पराः
अन्योन्यहीनकृत्यादिभिः
मदीयं देशं सर्वतः

केचन दुष्टजनाः
कलापकलुषितं कृत्वा पीडयन्ति।

जलक्षोभदुरितं
स्मारयति सर्वान्
प्रकृतिसंरक्षणमन्त्रम्।

प्रलयेन दीयते
एकः एव सन्देशः
मानवः प्रकृतिश्च
अन्योन्यरक्षायै
सर्वचराचरस्नेहः।
स्वीयकर्मप्रतिकूलनिमित्तं जलक्षोभं
दृष्ट्वा एकैकः स्वयमेव वदति दुःखित इति।

सरित्सागरसुन्दरदेशः
काननाचलमोहनदेशः
वृष्टिपातपरिलसितश्च।

साधनीया प्रतिदिनं सर्वैः
देशरक्षा।
तद्वत् मूल्यानि
आनन्देन प्रसारय लोकशान्तिम्।

लोकशान्त्यर्थम् उचितं कर्तुं
जनगणसहयोगस्तु
साहाय्य एव हि
विनाशितानां पुनःसृष्टिः
आर्द्रहृदयस्यापि सहवर्तित्वम्।

सहवर्तित्वमभिप्रदातुं

सुमनस्कानां साहाय्यं वरम्।

स्वसोदराणामतिजीवनं

भेदचिन्ताहीनस्य जनस्य स्वत्वम्।

हरामो भियं तेषां स्नेहदानेन

नवनवस्नेहदानैः

तेषां भावना फुल्ला।

सौहार्दयुक्तो यत्नः

केरलजनताभिः

तनु-मन-धनबोधं त्यक्त्वा

सर्वथा आचरितः।

जनहृदयेषु व्याप्तः स्नेहः

प्रतिदिनं प्रतिमनः प्रवर्धनं प्राप्य

अखिलं केरलं पुनर्निर्मातुम्। (२)

सरिद्गिरिसूनभासा

मनोहरी नारी चेयं

आत्ममानप्रवर्धनं

यत्नं कर्तुं प्रेरयन्ती

गच्छतीयं केरमाता मामकपुत्राः!। (२)

प्रकृतिस्नेहाधिष्ठितः भाषाकलासंबन्धः

मानवैक्यं द्रढयितुं समर्थ एव।

तच्चङ्ङाट्टजनैरर्प्यते बृहत्ओप्पना (२)

सुनिल्-जुनैद्-सजीवादिभिस्सहः (२)

आगतानां सकलानां जीवितसुखमाशंस्य

अनुग्रहमाशिषं प्रार्थयामहे ।। (४)

## संदर्भ सूची

1. केरलोदयः-डा. के एन् एष़ुत्तच्चन्
2. केरलचरित्रम् – के दामोदरन्
3. माप्पिलकला- जुनैद् मेट्टम्मल्